नं-१८३

नेत्रहोमविधि

नं. १६३८

12

नं-५८६



नं. ०५२४ क

[illegible]

नं. १३४४

6023
F= 8
complet


५५
१६३४

हो॰ १

ॐश्रीगणेशायनमः अथहोमविधिः मूले
नप्राणायामं अंगन्यासं करन्यासंच कृत्वा
यथोक्तकुंडे हस्तमात्रचतुरस्रचतुरंगुलो
च्छितस्थंडिले वा संस्कारचतुष्टयं कुर्यात्
तद्यथा मूलमंत्रेण समीक्ष्य फट् इति कुशै
श्चतुर्दिक्षु प्रोक्ष्य च पुनः संताड्य हुमिति
मंत्रेण मुष्टिबन्धेन जलेनासिंचेत् स्थंडिल
मध्ये त्रिकोण षट्कोणाष्टदलभूमन्दिरयु
क्तं यंत्रं विलिख्य यंत्रमध्ये ॐह्रींॐमिति वि
लिख्य पीठपूजां कुर्यात् तद्यथा मंडूकाय
नमः कालाग्निरुद्राय नमः आधारशक्तये
नमः कूर्माय नमः पृथिव्यै नमः सुधासिं
धवे नमः श्वेतद्वीपाय नमः कल्पवृक्षाय न
मः तन्मूले मणिमंडपाय नमः तन्मध्ये हे
मपीठाय नमः चतुर्विदिक्षु धर्माय नमः ज्ञा
नाय नमः वैराग्याय नमः ऐश्वर्याय नमः
चतुर्दिक्षु च अधर्माय नमः अज्ञानाय नमः
अवैराग्याय नमः अनैश्वर्याय नमः मध्ये
अनन्ताय नमः तत्त्वपद्माय नमः आनन्द
कन्दाय नमः संविन्नालाय नमः प्रकृतिम

यपत्रेभ्योनमः विकृतिमयकेसरेभ्योन
मः पंचाशद्वर्णबीजाढ्यकर्णिकायैनमः
ततैव अर्कमंडलायनमः चन्द्रमंडलाय
नमः वह्निमंडलायनमः संसत्वायनमः
रंरजसेनमः तंतमसेनमः आत्मनेनमः
अंतरात्मनेनमः परमात्मनेनमः ज्ञाना
त्मनेनमः मायातत्वायनमः कलातत्वा
यनमः विद्यातत्वायनमः परतत्वायनमः
ततःपीठशक्तीःपूजयेत् ओंजयायैनमः
ओंविजयायैनमः ओंअजितायनमः ओंअ
पराजितायैनमः ओंनित्यायैनमः ओंविला
सिन्यैनमः ओंदोग्ध्रीनमः ओंअघोरायैनमः
मध्ये मंगलायैनमः ह्रींवागीशीवागीश्व
रयोयोगपीठात्मनेनमः इतिशाक्तपीठे
वैस्नवपीठेतु ह्रींलक्ष्मीनारायणयोर्योग
पीठात्मनेनमः ओंह्रींवागीश्वरीभ्यांनमः
इतिमंत्रेणपूजयेत् वैस्नवपीठेतु ओंह्रीं
लक्ष्मीनारायणाभ्यांनमः इतिमंत्रेणपूज
येत् ततः सूर्यकान्तादर्शणेनःश्रोत्रियागा
रतोपिवा पात्रेणपिहितेपात्रेवह्निमानी

हो॰ २

पयेत्ततः फडिति मंत्रेण वह्निपात्रमादाय
हुमिति मंत्रेण उद्घाट्य फडिति मंत्रेण क्र
व्यादांशं वह्निं नैर्ऋत दिशि त्यजेत् मूलेन
अग्ने संस्थाप्य पुनः पूर्वोक्तसंस्कारं च तस्
यं कुर्यात् तद्यथा मूलेन वीक्ष्य फडिति मं
त्रेण कुशैः संप्रोक्ष्य फडिति कुशैः संताड्य
हुमिति मुष्टिना सिंचेत् परमाग्निना जाठ
राग्निना च तस्याग्नेरैक्यं संचिंतयेत् रमिति
मंत्रेण वह्नौ चैतन्यं योजयेत् ततः ॐकारे
णाभिमंत्र्य वमिति मंत्रेण धेनुमुद्रयाऽ
मृतीकृत्य फडिति मंत्रेण संरक्षेत् हुमिति
मंत्रेणाऽवगुंठ्य ॐकारेण कुंडोपरि त्रिः
भ्रामय प्राप्यागतामृतुस्नातां नीलेन्दीवर
धारिणीम् देवेन भुज्यमानां तां स्मरंस्तस्या यो
निमंडले ईशरेतोधिया वह्निं स्थापयेदात्म
संमुखम् ततो जातं पृष्ठयरानलः मूल
मंत्रं पठन् हूं वह्निचैतन्याय नमः इति मं
त्रं च पठन् देवीदेवयोराचमनं दद्यात्
चित्पिंगल हन हन दह दह पच पच सर्व
ज्ञाज्ञापय स्वाहेति मंत्रेण वह्निं प्रज्वाल्य

ज्वालिनीमुद्रां प्रदर्श्य अंजलिंबध्वा उत्थाय अ
ग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् सुवर्ण
वर्णममलं प्रसन्नं विश्वतोमुखम् इति मंत्रेण
उपतिष्ठेत् ॐ अस्य श्री षड्विंशतिवर्णा वन्हिमं
त्रस्य भृगुऋषिः गायत्रीछन्दः अग्निर्देवता
रंबीजम् ह्वयंशक्तिः हवने विनियोगः ॐ वै
श्वानर जातवेद इहावह लोहिताक्ष सर्वक
र्माणि साधय स्वाहेति मूलाधारोद्भूतं संविद
ग्निं ललाटनेत्रद्वारा निर्गमय्य तं वाह्याग्नि यु
क्तं पातयेत् ततः स्वदेहे न्यासं कुर्यात् भृगवे ऋ
षये नमः शिरसि गायत्रीछंदसे नमो मुखे
अग्नये देवतायै नमः हृदये रंबीजाय नमः
गुह्ये स्वाहाशक्तये नमः पादयोः तद्यथा स्रूं
हिरण्यायै नमः लिंगे स्रूं गगनायै नमः गुदे
स्रूं रक्तायै नमः शिरसि स्रूं कृष्णायै नमः मुखे
स्रूं सुप्रभायै नमः घ्राणे स्रूं बहुरूपायै नमः
नेत्रयोः स्रूं अतिरक्तायै नमः सर्वांगेषु ततो
देवन्यासं कुर्यात् देवेभ्यो नमः लिंगे पितृभ्यो
नमः गुदे गंधर्वेभ्यो नमः शिरसि यक्षेभ्यो न
मः मुखे नागेभ्यो नमः घ्राणे पिशाचेभ्यो नमः

होः
३
3

नेत्रयोः राक्षसेभ्योनमः सर्वांगेषु अथषडंग
न्यासः सहस्रार्चिषेनमः हृदि स्वस्तिपूर्णाय
नमः शिरसि उत्तिष्ठ पुरुषायनमः शिखायै
वषट् धूमव्यापिनेकवचायहुं सप्तजिह्वायने
त्रत्रयायवौषट् धनुर्धरायअस्त्रायफट् अथा
ग्निरष्टमूर्तिन्यासः ॐअग्नयेजातवेदसेनमः
मूर्ध्नि ॐअग्नयेसप्तजिह्वायनमः वामांसे ॐ
अग्नयेहव्यवाहनायनमः वामपार्श्वे ॐअ
ग्नयेअश्वोदर्यायनमः वामकटौ ॐअग्नये
वैश्वानरायनमः लिंगे ॐअग्नयेकौमारते
जसेनमः दक्षिणकटौ ॐअग्नयेविश्वमुखा
यनमः दक्षपार्श्वे ॐअग्नयेदेवमुखायनमः
दक्षिणांसे ततःमण्डूकादिवह्निमंडलपर्य
न्तंपीठदेवताःस्वदेहेन्यसेत् ततःअग्निपीठ
शक्तिन्यासः ॐपीतायैनमः १ ॐश्वेतायै
नमः २ ॐअरुणायैनमः ३ ॐकृष्णायैनमः
४ ॐधूम्रायैनमः ५ ॐतीव्रायैनमः ६ ॐस्फु
लिंगिन्यैनमः ७ ॐरुचिरायैनमः ८ ॐज्वा
लिन्यैनमः ९ ॐरंवह्निपीठासनायनमः १०
ततःस्वदेहे अग्निंध्यायेत् त्रिनेत्रमारक्ततनुं

सशुक्लवस्त्रं सुवर्णस्रजमग्निमीडे वराभ
यस्वस्तिकशक्तिहस्तंपद्मस्थमाकल्पसमूह
युक्तम् एवंध्यात्वामानसोपचारैः पूजांकुर्या
त् ततःजलेनपरिषिच्य प्रागग्रानुदगग्रान्वा
चीन्दर्भान्परिस्तरेत् ततःकुंडेस्थंडिलेवा
त्रिकोणाकाराग्निस्थःसमिधः पालाशसमि
धःविल्वसमिधश्चस्थापयेत् तत्रपश्चिमे ब्र
ह्मणेनमः दक्षिणेविष्णवेनमः उत्तरे रुद्रा
यनमः ततः मंडूकादिपरतत्वांतपीठदेवत
संपूज्य पीठशक्तीःपूजयेत् पीतायैनम इ
त्यादि तत्रस्वहृदयादनलमावाह्यगंधादिभिः
समभ्यर्च्य षट्सुकोणेषु मध्येचजिह्वास्तदे
वतायजेत् ईशानादिषुवायून्तकोणेषु षट्
समर्चयेत् हिरण्याचनिरिक्तान्तमध्येतुवज्र
रूपिणीम् केसरेषुअंगपूजामाद्दलेष्वष्टसुम्
तेयः मातरोष्टौदलांतेषुभैरवास्तुसदग्रतः
यराष्ट्रेन्द्रशक्त्याचावज्राद्यायुधसंयुताः एव
मावरणेषुक्तंसप्तभिर्पावकंयजेत् असितां
गोरुरुश्चैवक्रोधउन्मत्तसंज्ञकः कपालीभीष
णश्चापिसंहारश्चाष्टभैरवाः ततः स्रुवामेक

हो॰ ४

स्थान स्थालीस्थे तत्र वस्तूनि निःक्षिपेत् प्रणीता
प्रोक्षणीपात्रे आज्यस्थाली स्रुवं स्रुचम् अधो
मुखानि चैतानि होमद्रव्यं हूतं कुशान् समि
धः पंच पालाशीरन्यदप्युपयोगि यत् ततः
मूलमंत्रेण पवित्रद्वयकरणं ततः मूलेन शु
भांभसा सर्ववस्तुप्रोक्षणम् ततः प्रणीता
दीनि उत्तानानि विधाय प्रणीतां जलैः पूरयेत्
गंगे च यमुने चैवेति मंत्रेण तीर्थान्यावाह्य
अंकुशमुद्रया पुष्पादिकं निक्षिप्य पवित्रेष्ट
त्वा उत्पवनं कुर्यात् प्रणीतापात्रं उत्तरस्या
निधाय प्रणीतातः किंचिज्जलमुद्धृत्य प्रोक्ष
णीपात्रे क्षिपेत् पवित्रे गृहीत्वा प्रोक्षणीज
लेन हवनीयद्रव्यं मूलं पठन् प्रोक्षयेत् त
तः स्वदक्षिणतः ब्रह्मासनमास्तीर्य तत्र अं
कुशमुद्रयो कौमिति अत्र कर्मणि कृताकृ
तावेक्षकत्वेन त्वं ब्रह्मा भवेत्यावाह्य ओं न
मो ब्रह्मणे इति गंधादिभिरभ्यर्चयेत् ततः
स्रुक्स्रुवौ समादाय अधोमुखौ वन्हौ त्रियाप्रता
प्य वामहस्ते कृत्वा दक्षिणहस्तेन कुशेन
तयोरग्रमूलमध्यानि मार्जनं कृत्वा अर्च्यो

दकेन त्रिवारं संप्रोक्ष्य पुनर्वन्हौ प्रताप्य द
र्भान्ग्नौ प्रक्षिपेत् ततः स्रुवे ह्रां इच्छाशक्त्यै
नमः मूले ह्रीं ज्ञानशक्त्यै नमः मध्ये ह्रूं क्रिया
शक्त्यै नमः अग्रे एवं स्रुचि ततः आत्मदक्षि
णे कुशोपरि निदध्यात् ततः आज्यस्थाली
मादाय अस्त्राय फडिति प्रक्षाल्य अग्नौ त्रिः
परितप्य वामहस्तेन संस्थाप्य दक्षिणह
स्तेन अर्घ्योदकेन त्रिः प्रोक्ष्य पुनरग्नौ प्रता
प्य आत्मसंमुखे स्थापयेत् आज्यमानीयाज्य
स्थाल्यां निक्षिप्य मूलेनाज्यं वीक्ष्य अस्त्राय
फडिति आज्यं प्रोक्ष्य अस्त्राय फडिति दर्भैर्ह
ते संताड्य हूमिति अर्घ्यजलेन अभ्युक्षेत्
इति संस्कारचतुष्टयं कृत्वा ततः कुंडादंगा
रानुद्धृत्य वायुकोणे संस्थाप्य नम इति मंत्रे
ण आज्यस्थालीं स्थापयेत् इदं तापनम् त
तो दर्भयुगलं प्रज्वाल्य आज्ये निक्षिप्य दँप
शोधंनम इति मंत्रेण वन्हौ क्षिपेत् इदं प
वित्रीकरणम् पुनर्ज्वलितेन दर्भयुग्मेन
हूमिति मंत्रमुच्चरन् हृतं नीराज्य अग्नौ प्र
क्षिपेत् इत्युद्योतनम् ततः प्रज्वलित

हो॰
५
5

कुशमुष्टिं गृहीत्वा अस्त्राय फडिति मंत्रमुच्चर
न्दर्शयेत् इति उद्योतनम् तस्मादंगारादा
ज्यस्थालीमानीयं आत्मसंमुखे संस्थाप्य ता
नंगारानग्नौ प्रक्षिप्यांगारस्थानमार्जनं कृ
त्वा जलं स्पर्शयेत् ततः उत्तानयोर्हस्तयोरंगु
ष्ठकनिष्ठिकाभ्यां पवित्रे पृथक् पृथक्
धृत्वा अस्त्राय फडिति मंत्रमुच्चरन् प्राङ्मु
खं छेदनमुत्पूयात् पवित्रस्थानांतरे स्थाप
येत् पुनस्तेनैव प्रकारेण तथैवच्छेनेन प
वित्रांतरं गृहीत्वा तेन पवित्रेण नम इति
मुच्चरन् आत्मनोभिमुखं छेदनं संज्ञाप्य पू
र्वस्थापितपवित्र द्वयमग्नौ प्रक्षिप्य इति
उत्पवनोत्पवने पवने पवनेन चाज्यस्य सं
स्कुर्यात् संस्कारषड्उदीरिताः ततः प्रादेश
मात्रं सग्रंथिदर्भयुगलमाज्यस्थाल्यां छेदन
मध्ये निक्षिप्य आज्यदक्षिणभागे शुक्लपक्ष
म् आज्यवामभागे कृष्णपक्षं विचिंत्य वा
मे इडां दक्षे पिंगलां मध्ये सुषुम्णां ध्यात्वा
होमं कुर्यात् ततः स्रुवेण नम इति मंत्रे
मुच्चरन् दक्षिणभागाद्धृतमादाय ॐ अग्न

येस्वाहा इत्यग्नेर्दक्षिणलोचनेजुहुयात्
संपातमाज्यंतत्रैवदक्षिणभागेनिक्षिपेत्
पुनर्नमइति मंत्रेणवामभागाद्धृतमादाय
सोमायनम इतिवामलोचनेजुहुयात् सं
पातमाज्यंतत्रैववामभागेक्षिपेत् पुनर्न
मइतिमंत्रेण मध्यभागाद्धृतमानीय
अग्नीषोमाभ्यांस्वाहा इतिवन्हेर्ललाटनेत्रे
हुत्वा संपातमाज्यंमध्यभागेक्षिपेत् गोपा
लपक्षे ललाटनेत्राहुतिंनकुर्यात् नरसिं
हविषयेकुर्यादेव पुनर्नमइतिदक्षिण
भागादाज्यमादाय अग्नयेस्विष्टिकृतेस्वाहा
इत्यग्ने वक्त्रेहुत्वासंपातमाज्यं तत्रैवक्षिपेत्
इत्यग्निवक्त्रोद्घाटनम् ततःस्वशाखमुखार्यं
आहुतिंदत्वा स्वशाखमुखार्याहुतिशेषंघृतं
तत्रैवस्थापयेत् ततो महाव्याहृतिशेषं
स्थापयेत् ॐभूःस्वाहा ॐभुवःस्वाहा ॐस्वः
स्वाहा ॐभूर्भुवःस्वःस्वाहा ॐवैश्वानरजा
तवेदइहावलोहिताक्षसर्वकर्माणिसाध
यस्वाहा इत्यग्निमंत्रेणाहुतित्रयंदत्वाहुत
शेषंजलंपूर्णपात्रेस्थापयेत् ततःअग्नेर्गं

हो॰ ८

6

र्भाधानादिषोडषासंस्कारान्कुर्यात् यथागर्भा
धानं पुंसवनंसीमन्तोन्नयनंपुनः अनंतरं
जातकर्मस्यान्नामकरणंतथा उपनिष्क्रमणं
पश्चात् अन्नप्राशनमीरितम् चूडोपकरणे
भूयोमहानाम्नीमहाव्रतम् अथोपनिषदं
स्नानंगोदानोद्वाहनेस्मृतिः शुभेषुसर्विवा
होताक्रियास्ताक्रूरकर्मसु मरणांतासमुद्दि
ष्टावन्हेरागमवेदिभिः यथा अग्नेर्गर्भाधानं
कल्पयामिस्वाहा अग्नेपुंसवनंकल्पयामि
स्वाहा इत्यष्टाङ्गनिर्ज्जुहुयात् अग्नेसीमंतो
न्नयननंकल्पयामिस्वाहा ततसमयेअग्ने
त्वंअमुकनामासि ततन्मंत्राधिष्ठात्रिदेवता
नाम्नानामकुर्यात् अथवा अग्नेत्वंवरदना
मासि विश्वरूपनामासिवानामकुर्यात् ततः
अमुकनामाग्नयेनिष्क्रमणंकल्पयामिस्वा
हा इत्यष्टाङ्गनिर्ज्जुहुयात् एवंसंस्कारादिकं
कुर्यात् ततः तस्यपितरौ संपूज्य आत्मनि
योजये तस्यपितरौ वागीश्वरी वागीश्वरौ
यथा इदंपाद्यं वागीश्वर्यैनमः इतिपाद्यादि
भिःसंपूज्य वागीश्वर्यैनमः इतिपुष्पांजलि

त्रयंदत्वा वागीश्वर्यैनमः इतिनमस्कुर्यात्
एवंवागीश्वरंसंपूज्य वागीश्वरीसहितवागी
श्वरपूजितोसिदनमस्तेस्तुक्त्वा संहारमुद्रया
स्थंडिलांतं वहन्ता साघुटेश्वानीयस्वस्यदिश्या
पयेत् ततोग्नेर्जिह्वागमूर्तीनांमंत्रैरेकैकाहु
तीर्जुहुयात् यथा ह्मूंहरिण्यायैनमः इत्ये
काहुतिंजुहुयात् एवमग्रेपि ह्मूंगगनायै
नमः क्ष्मूंरक्तायैनमः ज्मूंकृष्णायैनमः ल्मूं
सुप्रभायैनमः यूंवहुरूपिण्यैनमः ग्मूंअ
ति रक्तायैनमः सहस्रार्चिषेहृदयायस्वा
हा उत्तिष्ठपुरुषायशिखायैवौषट् धूमव्या
पिनेकवचायहुंमस्वाहा सप्तजिह्वायनेत्र
त्रयाय वौषट्स्वाहा गोपालपद्ने सप्तजि
ह्वायनेत्राभ्यांवौषट् धनुर्धरायअस्त्रायफ
ट्स्वाहा अग्नयेजातवेदसेस्वाहा १ अग्न
येसप्तजिह्वायस्वाहा १ अग्नेकव्यवाहनाय
स्वाहा १ अग्नयेअश्वदरजायस्वाहा १ अग्नये
वैश्वानरायस्वाहा १ अग्नयेकौमारतेजसेस्वा
हा १ अग्नये विश्वमुखायस्वाहा १ अग्नयेवे
दमुखायस्वाहा १ ततोवामहस्ते स्रुवंसंस्था

हो॰ ७

प दक्षिणहस्तेन स्रुवमादाय नम इति स्रुच्चर
न् स्रुवेन चतुराज्याहुतीः स्रुचीदत्वाऽधोमुखे
न स्रुवेन स्रुचं पिधाय उत्तिष्ठन् वैश्वानरजात
वेदइहावलोहितादत्तसर्वकर्माणिसाधयस्वा
हावौषट् इत्यग्निमंत्रेण पूर्णाहुतिं दत्वा व्य
स्तेन च दशाऽऽहुःतीर्जुहुयात् ॐ स्वाहा १
ॐ श्रीं स्वाहा २ ॐ श्रीं ह्रीं स्वाहा ३ श्रीं ह्रीं क्लीं
स्वाहा ४ ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा ५ ॐ श्रीं ह्रीं
क्लीं ग्लौं गं स्वाहा ६ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणप
ये स्वाहा ७ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर
वरद स्वाहा ८ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये
स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद स
र्वजनं मे वशमानय स्वाहा १० इति दशाहुती
र्हुत्वा अग्नौ इष्टदेवतायंत्रं ध्यात्वा विह्नपीठे
देवतां ध्यात्वा वाह्याग्निना सहैक्यं विभाव्य व
ह्निरूपां तां विचिन्त्य नित्यपूजाक्रमेण सपरि
वारां तां संपूज्य नैवेद्यं दत्वा पुनराचमनीयं
दत्वा तांबूलं निवेद्य मूलेनामुकदेवतायै न
म इति पुष्पांजलित्रयेण संपूज्य नमस्कुर्या
त् ततो वह्नीहृदेवतयोरात्मनाच सहैक्यं वि

भाव्य तस्या मुखे पंचविंशाहुतीर्जुहुयात् य
था मूलमुच्चरन् इदं स्वाहा ऽमुकदेवतायै एत
त्क्रमेणैव पंचविंशाऽहुतीर्जुहुयात् इदं जै [illegible]
कीकरणम् ततो वह्निदेवतयोरात्मनाच सहै
क्यं विभाव्य मूलेनैकादशाहुतीर्जुहुयात् इ
दं तु नाडीसन्धानम् जुहुयादंगमुख्यानामा
हुतीनामनुक्रमात् एकैकामाहुतिं सम्यक्स
र्पिषा दैशिकोत्तमः इष्टदेवस्याहुतीनामेकै
काहुतिं चरेत् ततस्तन्मूलमंत्रेण दशधा जु
हुयाद्धुतम् ततः कल्पोक्तद्रव्येण दशांशं जु
हुयाज्जपात् होमं समाप्य कुर्वीत पूर्णाहुति
मनन्यधीः होमावशिष्टेनाज्येन पूरयित्वा स्रु
वं सुधीः पुष्पफलं निधायाग्ने स्रुवेण स्थाय
तः पुनः उत्थितो वै वौषडंतेन मूलेन जुहुयाद्ध
सौ तद्द्रव्येणाहुतीणां च जुहुयादाहुतिं दश
क् देवं विसृज्य स्वहृदि वह्नेर्जिह्वागमूर्त्तिभिः
जुहुयात् व्याहृतीर्हुत्वा प्रक्षेत्तस्योक्षणीजलैः
संप्रार्थनेन मनुनानत्वा तं विसृजेद्धृदि भोभो
वह्ने महाशक्ते सर्वकर्मप्रसाधक कर्मान्तरे
पि संप्राप्ते सान्निध्यं कुरु सादरम् वह्नेरुपवि

हो॰ ८ 8

त्रेनिक्षिप्यप्रणीतांबुधविक्षिपेत् विधिंविस्
ज्यसकुशान् परिधीन्विन्यसेवसो प्रवंहो
मेसमाप्याथतर्पयेद्देवतांजलैः इतिमंत्रम
होदध्यनुसरिणीहोमपद्धतिः ॥

आवाह्यतद्दर्पांपोनतर्पणादभिषेचनम्
तर्पयामिनमस्त्वेतिद्वितीयांतेष्टपूर्वकम्
मूलांतेनपदंदेयंसिंचामीत्यभिषेचने त
तोनानाविधैरन्नैस्तर्पयेद्विजसज्जमान् इष्ट
रूपान्समाराध्यतेभ्योदद्याच्चदक्षिणाम्
स्तेनंसंपूर्णतामेतिब्राह्मणाराधनात्क्षणा
त् देवताश्चप्रसीदंतिसंपद्यंतेमनोरथा
॥ इति ॥ १८४५ श्रीनगरे लिखा